# श्रीराधाष्टकम्

ॐ दिशिदिशिरचयन्तीं सञ्चयन्नेत्रलक्ष्मीं विलसितखुरलीभिः खञ्जरीटस्य खेलाम् ।
हृदयमधुपमल्लीं वल्लवाधीशसूनो- रखिलगुणगभीरां राधिकामर्चयामि ॥ १॥

पितुरिह वृषभानो रत्नवायप्रशस्तिं जगति किल सयस्ते सुष्ठु विस्तारयन्तीम् ।
व्रजनृपतिकुमारं खेलयन्तीं सखीभिः सुरभिनि निजकुण्डे राधिकामर्चयामि ॥ २॥

शरदुपचितराकाकौमुदीनाथकीर्त्ति प्रकरदमनदीक्षादक्षिणस्मेरवक्त्राम् ।
नटयदभिदपाङ्गोत्तुङ्गितानं गरङ्गां वलितरुचिररङ्गां राधिकामर्चयामि ॥ ३॥

विविधकुसुमवृन्दोत्फुल्लधम्मिल्लधाटी- विघटितमदघूर्णात्केकिपिच्छुप्रशस्तिम् ।
मधुरिपुमुखबिम्बोद्गीर्णताम्बूलराग स्फुरदमलकपोलां राधिकामर्चयामि ॥ ४॥

नलिनवदमलान्तःस्नेहसिक्तां तरङ्गा मखिलविधिविशाखासख्यविख्यातशीलाम् ।
स्फुरदघभिदनर्घप्रेममाणिक्यपेटीं धृतमधुरविनोदां राधिकामर्चयामि ॥ ५॥

अतुलमहसिवृन्दारण्यराज्येभिषिक्तां निखिलसमयभर्तुः कार्तिकस्याधिदेवीम् ।
अपरिमितमुकुन्दप्रेयसीवृन्दमुख्यां जगदघहरकीर्तिं राधिकामर्चयामि ॥ ६॥

हरिपदनखकोटीपृष्ठपर्यन्तसीमा तटमपि कलयन्तीं प्राणकोटेरभीष्टम् ।
प्रमुदितमदिराक्षीवृन्दवैदग्ध्यदीक्षा गुरुमपि गुरुकीर्तिं राधिकामर्चयामि ॥ ७॥

अमलकनकपट्टीदृष्टकाश्मीरगौरीं मधुरिमलहरीभिः सम्परीतां किशोरीम् ।
हरिभुजपरिरब्ध्वां लघ्वरोमाञ्चपालीं स्फुरदरुणदुकूलां राधिकामर्चयामि ॥ ८॥

तदमलमधुरिम्णां काममाधाररूपं परिपठति वरिष्ठं सुष्ठु राधाष्टकं यः ।
अहिमकिरणपुत्रीकूलकल्याणचन्द्रः स्फुटमखिलमभीष्टं तस्य तुष्टस्तनोति ॥ ९॥

इति श्रीरूप गोस्वामि विरचित स्तवमालायां श्रीराधाष्टकं सम्पूर्णम् ॥